# Shri Kodandapani Suprabhatam

# શ્રીકોદણ્ડપાણિસુપ્રભાતમ્

## Document Information

Text title : kodaNDapANisuprabhAtam

File name : kodaNDapANisuprabhAtam.itx

Category : raama, suprabhAta

Location : doc_raama

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : December 22, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 15, 2021

*sanskritdocuments.org*

# શ્રીકોદણ્ડપાણિસુપ્રભાતમ્

વન્દે વેઙ્કટશેષાર્યવત્સવંશશિરોમણિમ્ ।
વાત્સ્યશ્રીવરદાચાર્યતનયં કરુણાનિધિમ્ ॥

શ્રીરામચન્દ્ર કરુણાવરુણાલય શ્રી-
સીતામુખામ્બુજવિકાસક બાલસૂર્ય!।
સૌમિત્રિમિત્ર ! ભરતાભિરતાપ્તમિત્ર !
શત્રુઘ્ન હે ! રઘુપતે ! તવ સુપ્રભાતમ્ ॥ ૧॥

ભાસ્વાનુદેતિ વિકચાનિ સરોરુહાણિ
પશ્ય સ્મરન્ મધુરકૂજિતષડ્પદાનિ ।
ત્વદ્વીક્ષણોન્મિષિતનાભિસરોજવેધો
વેદધ્વનેઃ રઘુપતે ! તવ સુપ્રભાતમ્ ॥ ૨॥

ત્વાં બોધયન્તિ પરિતઃ શ્રુતયઃ શ્રુતીનાં
સારેણ સાનુજ! ભવત્પ્રતિબોધકેન ।
શ્લોકેન કૌશિક મુખોદ્ગલિતેન કર્ણ-
પીયૂષવદ્રઘુપતે ! તવ સુપ્રભાતમ્ ॥ ૩॥

ત્વાં બોધયન્તિ વિબુધાઃ શ્રુતિભોગ્યવેણુ-
વીણામૃદઙ્ગપણવાદિતતાનુવાદૈઃ ।
સ્તોત્રૈર્ધરાસુરવરસ્તુતિઘોષમિત્રૈઃ
આકર્ણ્યતાં રઘુપતે ! તવ સુપ્રભાતમ્ ॥ ૪॥

ઉદ્યાનવાસરસિકાઃ શુકશારિકાદ્યાઃ
હૃદ્યા હરેહરિરિતિ દ્વિજઘોષહૃદ્યૈઃ ।
હૃદ્યાં મુદં વિદધતીહ તવાપદાન-
પદ્યૈર્દ્વિજાઃ રઘુપતે ! તવ સુપ્રભાતમ્ ॥ ૫॥

બ્રહ્મા શિવશ્શતમખશ્ચ મખાશનૌઘૈઃ

ત્વદ્ધામ ગોપુરભુવિ પ્રતિપાલયન્તિ ।
ત્વત્પાદપઙ્કજસિષેવિષવોઽવિશેષ-
ભક્તૈર્દ્વિજૈ રઘુપતે ! તવ સુપ્રભાતમ્ ॥ ૬॥

સૂર્યેન્દુસન્નિધિવશાદિવ દેવસઙ્ઘઃ
સોત્ફુલ્લવક્ત્રકમલાઞ્જલિકુડ્મલોકૈઃ ।
મન્દારસુન્દરકરૈઃ પ્રતિપાલ્યતેઽર્ચા-
બદ્ધાદરૈઃ રઘુપતે ! તવ સુપ્રભાતમ્ ॥ ૭॥

તીર્થાભિષેકપરિશુદ્ધધિયોઽર્ચકાસ્તે
પૂર્ણાભિષેકકલશાઃ પરિચારકાશ્ચ ।
સ્તુત્વા ભવન્તમભિષેકમુખોપચાર-
ચર્યોત્સુકા રઘુપતે ! તવ સુપ્રભાતમ્ ॥ ૮॥

સીતામુખેન્દુસવિધેઽપિ સદા પ્રસન્નં
મન્દસ્મિતેન મધુરં સુધયેવ લોકૈઃ ।
લમ્બાળકાળિલલિતં તવ વક્ત્રપદ્મં
સંશોભતાં રઘુપતે ! તવ સુપ્રભાતમ્ ॥ ૯॥

શ્રીકોસલેશ્વરપુરાકૃતભાગ્યરાશે !
શ્રીકોસલેન્દ્રતનયાનયનાભિરામ!।
સાકેતસાધુકુલકાઙ્ક્ષિતકલ્પકશ્રીઃ !
સીતામનોહરમણે ! તવ સુપ્રભાતમ્ ॥ ૧૦॥

ઉદ્દણ્ડશૌણ્ડભુજખણ્ડિતખણ્ડપર્શુ-
કોદણ્ડચણ્ડરવપિણ્ડિતસાણ્ડજાણ્ડ!।
કોદણ્ડદણ્ડવરમણ્ડિતબાહુદણ્ડ !
શ્રીખણ્ડચર્ચિતતનો ! તવ સુપ્રભાતમ્ ॥ ૧૧॥

ઇત્થં વેઙ્કટશેષેણ સુપ્રભાતસ્તુતિઃ કૃતા ।
શ્રીરામચરણામ્ભોજયુગભૂષા સમર્પિતા ॥ ૧૨॥

નીલોત્પલાનિ સરસીષ્વિહ સઙ્કુચન્તિ
સાપત્રપાણિ તવ દૃગ્તુલયોર્વિલાસે ।
ધામાનિ તે ચ વિકચાનિ સરોરુહાણિ
શ્રીરામચન્દ્રદયિતે ! તવ સુપ્રભાતમ્ ॥ ૧૩॥

પ્રાતસ્સુવર્ણમણિદર્પણનાયિકાસ્ય
    વીક્ષાં વદન્તિ સુધિયઃ શુભમેવ પત્યુઃ ।
સર્વં ત્વદાનનવિલોકનતોઽસ્ય સિધ્યેત્
    ઉત્તિષ્ઠ મૈથિલસુતે ! તવ સુપ્રભાતમ્ ॥ ૧૪॥

॥ ઇતિ શ્રીકોદણ્ડપાણિસુપ્રભાતં સમાપ્તમ્ ।

Encoded and proofread by PSA Easwaran

*Shri Kodandapani Suprabhatam*

pdf was typeset on December 15, 2021

Please send corrections to *sanskrit@cheerful.com*